Reg. No. | | | | | | | | | |

# BASSKCN 201

## II Semester B.A. Degree Examination, September 2022
## (DSCC)
## (2021 – 22 Batch Onwards) (NEP – 2020)
## SANSKRIT
## C3 – Champoo Kavyam

Time : 2 Hours                                                    Max. Marks : 60

***सूचना :*** ***चतुर्थ–षष्ठ****प्रश्नयो:* ***संस्कृत****भाषया उत्तरयत । अन्यत्र* ***कर्णाटक****भाषया* ***आङ्ग्ल****भाषया* ***संस्कृत****भाषया वा उत्तरयत ।*

I. **द्वौ** अनुवादं कृत्वा विवृणुत ।                                                    **(2×5=10)**

1) अपि कुशलममर्त्या: स्वागतं साम्प्रतं व:
शमितदनुजदम्भा किं नु दम्भोलिकेलि: ।
अपि धिषणमनीषानिर्मिता नीतिमार्गा:
त्रिदशनगरयोगक्षेमकृत्ये क्षमन्ते ।।

2) कौसल्यायै प्रथममदिशत्भूपति: पायसार्धं
प्रादादर्धं प्रणयमधुरं केकयेन्द्रस्य पुत्र्यै ।
एते देव्यौ तरलमनस: पत्युरालोच्य भावं
स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ।।

3) उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि ।
निर्दग्धुं निखिला: पलाशसमिधो मेध्यादयोध्यारणे–
राविर्भूतमभूतपूर्वमपरं यत्किञ्चिदेकं मह: ।।

II. **पञ्च** वाक्यानि सन्दर्भसहितं व्याख्यात ।                                                    **(5×3=15)**

1) तानन्तरेण निपतेत्क्व नु मत्प्रणाम: ।
2) यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम् ।
3) नाभीपुटाय पुरुषाय नम: परस्मै ।
4) अस्त्राणि जृम्भाकादीनि जम्भशासनशासनात् ।
5) रामस्य पादरजसा प्रकृतीं प्रपेदे ।
6) अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ ।
7) तस्मादमुं जनपदं विदुरङ्गसंज्ञम् ।

P.T.O.

III. **द्वौ** प्रबन्धरूपेण उत्तरं लिखत । **(2×8=16)**

1) भोजराजस्य देशकालकृती: विवृणुत ।
2) विष्णु–देवतागणयो: संवादसारं यथापाठ्यं वर्णयत ।
3) रावणस्य दौष्ट्येन देवै: प्राप्तं पराभवं यथापाठ्यं वर्णयत ।
4) गङ्गावतरणम् – विवृणुत ।

IV. **द्वौ संस्कृतेन** टिप्पणीं लिखत । **(2×3=6)**

1) भोजराज: ।
2) भागीरथी ।
3) चम्पूरामायणस्य मङ्गलश्लोक: ।
4) अङ्गदेश: ।

V. **द्वौ कन्नड**भाषया टिप्पणी रचयत । **(2×4=8)**

1) चम्पूकाव्यम् ।
2) भोजराज: ।
3) रामाद्यवतार: ।
4) शापवाक्यम् ।

VI. अधोदत्तेषु यथारुचि **पञ्च** संयोजयत । **(5×1=5)**

| **अ** | **आ** |
|---|---|
| 1) तमसा | महाविष्णु: |
| 2) कुशीलवौ | श्रीराम: |
| 3) कालमेघ: | कुशलवनामधारिणौ |
| 4) लङ्का | नदी |
| 5) इन्द्रोद्यानम् | कौशिक: |
| 6) दाशरथि: | मार्गदर्शी |
| 7) विश्वामित्र: | रावण: |
| | नन्दनम् |

______________